॥ श्रीगुरुभ्यो नमः ॥ ॥ श्री शीतलाष्टकं ॥ ॥ श्रीमहागणाधिपतये नमः ॥

ओं अस्य श्री शीतला स्तोत्रस्य महादेव ऋषिः । अनुष्टुप् छन्दः । श्रीशीतला देवता ।
श्रीं बीजं । ह्रीं शक्ति । सर्वविस्फोटकनिवृत्यर्थे जपे विनियोगः ॥

ध्यानम् ॥ ध्यायामि शीतलां देवीं रासभस्थां दिगम्बराम्।
मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम्॥ पंचपूजां विदाय ॥

॥ "ओं ह्रीं श्रीं शीतलायै नमः ॥" (११)

ओं ह्रीं शीतले स्फोटकादीन् विनाशय विनाशय विदहं शमय शमय तन्तून् भेदय
भेदय ज्वरं हर हर स्वास्थ्यं कुरु कुरु हुं फट् स्वाहा ॥(३)॥

॥ मूलस्तोत्र ॥ ईश्वर उवाच ॥

वन्देऽहं शीतलांदेवीं रासभस्थां दिगम्बराम् ।
मार्जनीकलशोपेतां शूर्पालङ्कृतमस्तकाम् ॥१॥
वन्देऽहं शीतलांदेवीं सर्वरोगभयापहाम् ।
यामासाध्य निवर्तन्ते विस्फोटकभयं महत् ॥२॥
शीतले शीतले चेति यो ब्रूयाद् दाहपीडितः ।
विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति ॥३॥
यस्त्वामुदकमध्ये तु ध्यात्वा पूजयते नरः ।
विस्फोटकभयं घोरं गृहे तस्य न जायते ॥४॥
शीतले ज्वरदग्धस्य पूतिगन्धयुतस्य च ।
प्रणष्टचक्षुषां पुंसां त्वामाहुः जीवनौषधम् ॥५॥
शीतले ! तनुजान् रोगान् नृणां हरसि दुस्त्यजान् ।
विस्फोटकविदीर्णानां त्वमेकाऽमृतवर्षिणी ॥६॥
गलगण्डग्रहारोगा ये चान्ये दारुणा नृणाम् ।
त्वदनुध्यानमात्रेण शीतले यान्ति सङ्क्षयम् ॥७॥
न मन्त्रो नौषधं तस्य पापरोगस्य विद्यते ।
त्वामेकां शीतले धात्री नान्यां पश्यामि देवताम् ॥८॥
॥फल–श्रुति॥ मृणालतन्तुसदृशीं नाभिहृन्मध्यसंस्थिताम् ।
यस्त्वां चिन्तयते देवि तस्य मृत्युर्न जायते ॥९॥

अष्टकं शीतलादेव्या यो नरः प्रपठेत्सदा ।
विस्फोटकभयं घोरं गृहे तस्य न जायते ॥१०॥
श्रोतव्यं पठितव्यं च श्रद्धाभाक्तिसमन्वितैः ।
उपसर्गविनाशाय परं स्वस्त्ययनं महत् ॥११
शीतले त्वं जगन्माता शीतले त्वं जगत्पिता ।
शीतले त्वं जगद्धात्री शीतलायै नमो नमः ॥१२॥
रासभो गर्दभश्चैव खरो वैशाखनन्दनः ।
शीतलावाहनश्चैव दूर्वाकन्दनिकृन्तनः ॥१३॥
एतानि खरनामानि शीतलाग्रे तु यः पठेत् ।
तस्य गेहे शिशूनां च शीतलारुङ् न जायते ॥१४॥
शीतलाष्टकमेवेदं न देयं यस्यकस्यचित् ।
दातव्यं च सदा तस्मै श्रद्धाभक्तियुताय वै ॥१५॥
॥ स्वस्ति श्रीस्कन्दपुराणे शीतलाष्टकं सम्पूर्णम् ॥

B.N. Shrinath Udupa
‘ TRIPURASHRI ’
Karikallkatte Japthi Post Kundapur TQ 576211
Udupi Dt Karnataka State INDIA
Cell; +91-9740069904
Email:- shrinath.udupa@gmail.com

Shrinath Udupa